# कर्म प्रकृति विचार

श्री पार्श्वनाथ दिगम्बर जैन मन्दिर
भट्टारकश्री सकलकीर्ति
श्रुतभण्डार ईडर (गुजरात)

श्री पार्श्वनाथ दि. जैन मंदिर, भट्टारकश्री सकलकीर्ति
श्रुत भंडार ईडर-३८३४३० गुजरात(S.K.)

## ग्रन्थ परिचय-पत्र

| | | | |
|---|---|---|---|
| मन्दिर/ग्रन्थ भण्डार का नाम | | | |
| क्रम संख्या | १२७६ | वेष्टन संख्या | २३ |
| ग्रन्थ का नाम | कर्मप्रकृति विचार | आकार से.मी. | २८×१२ |
| ग्रन्थकार का नाम | | पत्र (पृष्ठ) संख्या | २ |
| टीकाकार | | पंक्ति अक्षर | १७×४० |
| प्रतिलिपिकार | | रचनाकाल | |
| कागज/ताड़पत्र | कागज | प्रतिलिपिकाल | |
| लिपि व भाषा | देव. संस्कृत | पूर्ण/अपूर्ण | अपूर्ण |
| गद्य/पद्य | गद्य | स्थिति : जीर्ण/अति जीर्ण/सामान्य | |
| विषय | अध्यात्म | | |
| विशेष विवरण | | | |

१२३

कर्म प्रकृति विचार:

अपूर्ण

कर्मप्रकृति विचार

पत्र २ संपूर्णं

॥श्रीअर्हते नमः॥ ॥प्रक्षीणावरणद्वितमोहप्रत्यूहकर्म्मणे। अनंतानंतधीदृष्टिसुखवीर्य्यात्मने नमः॥१॥ आत्मनः
प्रदेशैः प्रबद्धं कर्म्म द्रव्यकर्म्म भावकर्म्म नोकर्म्म चेति त्रिविधं। तत्र प्रकृतिस्थित्यनुभागप्रदेशभेदेन द्रव्यकर्म्म चतुर्विधं
। तत्र ज्ञानप्रच्छादनादिस्वभावः प्रकृतिः सा च मूलप्रकृति उत्तरप्रकृति उत्तरोत्तरप्रकृतिरिति त्रिधा। तत्र ज्ञानावरणीयं।
दर्शनावरणीयं। वेदनीयं। मोहनीयं। आयुष्यं। नाम गोत्रमंतरायश्चेति। मूल प्रकृतिरष्टधा। तत्रात्मनो ज्ञानं विशेष
=स्तस्मवस्त्र ग्रहणमावृणोतीति ज्ञानावरणीयं। श्लक्ष्णकांडपटवत् दर्शनं सामान्यग्रहणमावृणोतीति दर्शनावरणीयं प्रतीहारव
५ त्। सुखं दुःखं वा इंद्रियद्वारैर्वेदयतीति वेदनीयं। मधुलिप्तखड्गधारावत् आत्मनः मोहयतीति मोहनीयं मद्यवत्।
शरीरे आत्मानमेति धारयतीति आयुष्यं। शृंखलावत्। नानायोनिषु नारकादिपर्य्यायैरात्मानं नमयतीति शब्दय
=कथ्यते तिनाम चित्रकारवत्। उच्चनीचकुलेष्वात्मानेन गूह्यत इति गोत्रं कुंभकारवत्। दानादिविघ्नं कर्त्तेमंतरं दातृपा
त्रादीनां मध्ये एतीत्यंतरायः भांडागारिकवत्। उत्तरप्रकृतयोष्टचत्वारिंशदुत्तरशतं [illegible] तद्यथा॥ मतिज्ञानावरणी
यं। श्रुतज्ञानावरणीयमवधिज्ञानावरणीयं मनःपर्य्यायज्ञानावरणीयं। केवलज्ञानावरणीयं चेति। ज्ञानावरणी
यस्य प्रकृतयः पंच तत्र पंचभिरिंद्रियैर्मनसा च ज्ञानं मतिज्ञानं। तदावृणोतीति मतिज्ञानावरणीयं। मतिज्ञान १

गृहीतार्थादन्यस्यार्थस्य ज्ञानं श्रुतज्ञानं तदावृणोतीति श्रुतज्ञानावरणीयं। वर्णगंधरसस्पर्शयुक्तसामान्यपुद्गलद्रव्यं त
त्संबंधिसंसारिजीवद्रव्याणि च क्षेत्रकालसवत्तावानधिकृत्य यत्प्रत्यक्षं जानातीत्यवधिज्ञानं। तदावृणोतीत्यवधिज्ञा
नावरणीयं। परेषां मनसि वर्त्तमानमर्थं यज्ज्ञानाति तन्मनःपर्य्ययज्ञानं। तदावृणोतीति मनःपर्य्ययज्ञानावरणीयं।
इंद्रियाणि प्रकाशं मनश्चानपेक्ष्य त्रिकालगोचरलोकालोकसकलपदार्थानां युगपदवभासनं केवलज्ञानं। तदावृ
णोतीति केवलज्ञानावरणीयं। चक्षुर्दर्शनावरणीयमचक्षुर्दर्शनावरणीयमवधिदर्शनावरणीयं। केवलदर्शनाव
रणीयं। निद्रा निद्रानिद्रा प्रचला प्रचलाप्रचला स्त्यानगृद्धिरिति दर्शनावरणीयं नवधा। तत्र चक्षुषा वस्तुसामान्यग्र
हणं चक्षुर्दर्शनं। तदावृणोतीति चक्षुर्दर्शनावरणीयं। शेषैः स्पर्शनादींद्रियैर्म्मनसा च वस्तुसामा न्यग्रहणमच
क्षुर्दर्शनं। तदावृणोतीत्यचक्षुर्दर्शनावरणीयं। रूपिसामान्यग्रहणमवधिदर्शनं। तदावृणोतीत्यवधिदर्श
नावरणीयं। समस्तवस्तुसामान्यग्रहणं केवलदर्शनं। तदावृणोतीति केवलदर्शनावरणीयं। यतो गच्छतः स्था
नं तिष्ठत उपवेशनमुपविशतः शयनं च भवति। सा निद्रा उत्थापितेपि लोचनमुद्घाटयितुं न शक्नोति यतः सा निद्रा
निद्रा यत ईषदुन्मील्य स्वपिति स्थितोपीषदीषज्ज्ञानाति सा प्रचला यतो निद्रायमाणो लालां वहत्यंगानि चाल
यति सा प्रचलाप्रचला यत उत्थापितेपि नः स्वपिति निद्रायमाणो वोत्थाय कर्म्माणि करोति। स्वप्नायते जल्पति च सा स्त्या

=चलं नामात्मीयविशेषेषु चलतीति चलं स्मृतं लसत्कल्लोलमालासु जलमेकमिवस्थितं ॥ यथा स्वकारितेर्हच्चैत्यादौ देवोयं मम अन्यकारिते । अन्यस्यायमिति
मन्मोहाच्छ्राद्धापि चेष्टते ॥ तदप्यलब्धमाहात्म्यं पाकात्सम्यक्त्वकर्मणः मलिनं मलसंगेन शुद्धं स्वर्णमिवोद्भवेत् ॥ स्थान एव स्थितं कंप्रमगाढमिति कीर्त्यते ।
वृद्धयष्टिरिवात्यक्तस्थाना करतले स्थिता स्थानमप्यनंतशक्तित्वे सर्वेषामर्हतामयं देवोस्मै प्रभुरेषोस्मा इत्यास्था सुदृशामपि ॥ प उलि

×द्मर

नसृद्धिः सातवेदनीयमसातवेदनीयं चेति वेदनीयं द्विधा तत्रेंद्रियसुखकारणं चंदनकर्पूरस्रग्वनितादिविषय
प्राप्तिकारणं सातवेदनीयं इंद्रियदुःखकारणविषशस्त्राग्निकंटकादिप्राप्तिनिमित्तमसातवेदनीयं । दर्श
नमोहनीयं चारित्रमोहनीयं चेति मोहनीयं द्विधा तत्र मिथ्यात्वं । सम्यग्मिथ्यात्वं । सम्यक्त्वं चेति दर्शनमोह
नीयं त्रिधा तत्र अश्रद्धानकारणं मिथ्यात्वं । तत्त्वातत्त्वश्रद्धानकरणं सम्यग्मिथ्यात्वं । तत्त्वार्थश्रद्धानरूपं सम्यग्
दर्शनं चलमलिनमगाढं करोतीति सा सम्यक्त्वप्रकृतिः । कषायानोकषायभेदाच्चारित्रमोहनीयं द्विधा
तत्रानंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पतः प्रत्येकं क्रोधमानमायालोभा इति कषायाः
षोडश । तत्रानुबंधिक्रोधमानमायालोभाः सम्यग्दर्शनं विराधयंति अप्रत्याख्यानक्रोधमानमायालो
भा देशसंयमं प्रतिबध्नंति । प्रत्याख्यानक्रोधमानमायालोभाः सकलसंयमं प्रतिबध्नंति । संज्वलनक्रो
धमानमायालोभा यथाख्यातचारित्रं निवारयंति । तत्रानंतानुबंधिनः क्रोधमानमायालोभा यथाक्र
मं शिलाभेदशिलास्तंभवेणुमूलकृमिरागकंबलसदृशास्तीव्रतमशक्तयः अप्रत्याख्यानक्रोधमान
मायालोभा यथाक्रमं हलभेदअस्थिश्रृंविशृंगचक्रमलसदृशास्तीव्रतरशक्तयः प्रत्याख्यानक्रोधमा 2
नमायालोभा यथाक्रमं धूलिरेखाकाष्ठगोमूत्रतनुमलसदृशास्तीव्रशक्तयः संज्वलनक्रोध

×मात्मानं ३ =घृणांकरोति २

मानमायालोभा यथाक्रमं जलरेखावेत्रखुरपदहरिद्रारागसदृशा मंदत्वात्कषायः यतो हास्योद्भवति तद्धास्यं यतो रमयति सा रतिः
यतो विषयेषूद्भवति सा अरतिः यतः शोचयति रोदिति स शोकः यतो बिभेत्यनर्थात्तद्भयं यतो जुगुप्सते सा जुगुप्सा यतः
स्त्रियमात्मानं मन्यमानः पुरुषायाभिवदयति रंतुमिच्छति स स्त्रीवेदः यतः पुमांसं मन्यमानः स्त्रियां वदयति रंतुमिच्छ
ति स पुंवेदः यतो नपुंसकमात्मानं मन्यमानः स्त्रीपुंसावभिवदयति रंतुमिच्छति स नपुंसकवेदः नारकायुष्यं तिर्यगा
युष्यं मनुष्यायुष्यं देवायुष्यं चेति आयुष्ककर्म चतुर्विधं तत्र यन्नारकशरीरे आत्मानं धारयति न्नारकायुष्यं य × त५
त्तिर्यक्शरीरे जीवं धारयति तत्तिर्यगायुष्यं यन्मनुष्यशरीरे प्राणिनं धारयति तन्मनुष्यायुष्यं । यद्देवशरीरे देहि
नं धारयति तद्देवायुष्यं गतिजातिशरीरबंधनसंघातसंस्थानांगोपांगसंहननवर्णगंधरसस्पर्शानुपूर्व्यगुरुलघू
पघातपराघाततपोद्योतोच्छ्वासविहायोगतित्रसस्थावरबादरसूक्ष्मपर्याप्तप्रत्येकशरीरसाधारणशरीरस्थिरा
स्थिरशुभाशुभसुभगदुर्भगसुस्वरदुःस्वरादेयानादेययशस्कीर्त्ययशस्कीर्तिनिर्माणतीर्थकरत्वानीति पिंडापि
डरूपा नामकर्मप्रकृतयो द्वाचत्वारिंशत् [redacted] त्पिंडप्रकृतीनां तद्भेदेन सर्वा नामप्रकृतयस्त्र्योनवतिः नारकतिर्यग्
मनुष्यदेवगतिभेदाद्गतिनामकर्म चतुर्द्धा यतो जीवस्य नारकपर्यायो भवति सा नारकगतिः यतस्तिर्यक्प
र्यायो भवति प्राणिनः सा तिर्यग्गतिः यतो मनुष्यपर्यायो भवत्यात्मनः सा मनुष्यगतिः । यतो देवपर्यायो भव
ति देहिनः सा देवगतिः नारकादित्वप्राप्तिर्गमनहेतुर्वा गतिनाम एकद्वित्रिचतुःपंचेंद्रियभेदाज्जातिनाम पंच

धा। तत्र स्पर्शनेंद्रियवंतो जीवा भवंति। यतः सा एकेंद्रियजातिः यतः स्पर्शनरसनेंद्रियवंतो जीवा भवंति सा द्वींद्रिय
जातिः यतः स्पर्शनरसनघ्राणेंद्रियवंतो जीवा भवंति। सा त्रींद्रियजातिः यतः स्पर्शनरसनघ्राणचक्षुष्मंतो जीवा भ
वंति सा चतुरिंद्रियजातिः यतः स्पर्शनरसनघ्राणचक्षुःश्रोत्रेंद्रीयवंतो जीवा भवंति। सा पंचेंद्रियजातिः औदारिक
वैक्रियिकाहारकतैजसकार्म्मणानीति शरीरनाम पंचधा। तत्र यत आहारवर्गणायाताः पुद्गलस्कंधा औदारि
कशरीरकरणे परिणमंति तदौदारिकशरीरनाम यत आहारवर्गणायाताः पुद्गलस्कंधा वैक्रियिकशरीररूपे
ण परिणमंति तद्वैक्रियिकं शरीरनाम यत आहारवर्गणायाताः पुद्गलस्कंधा आहारकशरीररूपेण परिणमंति।
तदाहारकशरीरनाम यतस्तैजसवर्गणायाताः पुद्गलस्कंधास्तैजसशरीररूपेण परिणमंति। तत्तैजसशरी
रनामकर्म्म। कार्म्मणवर्गणायाताः पुद्गलस्कंधाः कार्म्मणशरीररूपेण परिणमंति। यतस्तत्कार्म्मणशरीरनाम
औदारिकादिशरीरपंचकाश्रितं बंधननामकर्म्म पंचधा। तत्रौदारिकशरीरकरणे परिणतपुद्गलानां परस्परसंश्ले
षणरूपो बंधो यतो भवति तदौदारिकशरीरबंधननाम। एवं वैक्रियिकाहारकतैजसकार्म्मणशरीरेण परि
णतपुद्गलानां परस्परसंश्लेषरूपो बंधो यतो भवति तानि वैक्रियिकाहारकतैजसकार्म्मणशरीरबंधननामा
नि औदारिकशरीरपंचकाश्रितानि संघातनामानि। पंच तत्रौदारिकशरीरकरणे परिणतपरस्परबंधपुद्गला ३
नां तदाकारविषम्पालावकारणमौदारिकशरीरसंघातनाम। एवं वैक्रियिकाहारकतैजसकार्म्मणशरीररू

×सं२

पेणपरिणतपरस्परसंबंधउज्जलस्कंधानांततदाकारविषम्यात्तावकारणानि। वैक्रियिकाहारकतैजसकार्मणशरीरसं
घातनामानिज्ञातव्यानि समचतुरस्रन्यग्रोधस्वातिकुब्जवामनहुंडभेदात्संस्थाननामषोढा। तत्रयतःसर्वत्रदशांता
ललक्षणलक्षितचतुरस्रसंस्थानशरीराकारोभवति। तत्समचतुरस्रसंस्थाननाम। यतउपरिविस्तीर्णोधःसंकुचित
शरीराकारोभवतितन्न्यग्रोधसंस्थाननाम। यतोधोविस्तीर्णउपरिसंकुचितशरीराकारोभवतितत्स्वातिसंस्थाननाम
स्वातिःवाल्मीकंतस्याइवस्यात् यतोह्रस्वसर्वांगशरीराकारोभवति। तत्कुब्जसंस्थाननामयतोदीर्घहस्तपादाह्रस्वकबं
धस्वशरीराकारोभवतितद्वामनसंस्थाननामयतःपाषाणपूर्णगोणीवत्ग्रंथ्यादिविषमशरीराकारोभवतितद्धुंडसं
स्थाननाम औदारिकवैक्रियिकाहारकशरीरभेदादंगोपांगनामत्रिधा। तत्रौदारिकशरीरस्यचरणद्वयबाहुद्वय।
नितंबपृष्ठवक्षःशीर्षात्तदादष्टांगानि अंगुलिकर्णनासिकाद्युपांगानिकरोतियत्तदौदारिकशरीरांगोपांगनाम।
एवंवैक्रियिकाहारकशरीरयोरपियदंगोपांगकारकंतद्वैक्रियिकाहारकशरीरांगोपांगनामद्वयंज्ञातव्यं। वज्रर्षभ
नाराचवज्रनाराचार्द्धनाराचकीलितासंप्राप्तासृपाटिकाभेदतःसंहनननामषोढा। तत्रवज्रवत्स्थिरास्थिऋषभो
वेष्टनंनाराचकीलितबंधोयतोभवतितद्वज्रऋषभनाराचसंहनननामयतोवत्स्थिरास्थिकीलिकाबंधःसामान्यावे ×वज्रर्ष
ष्टनंचभवतितद्वज्रनाराचसंहनननाम। यतोवज्रवत्स्थिरास्थिबंधःसामान्यकीलिकाएतद्द्वयंचभवतितन्नाराचसं
हनननाम। यतोवज्रवत्स्थिरास्थिबंधःसामान्यकीलिकाएतद्द्वयंचभवति। तन्नाराचसंहनननामयतःसामान्यास्थि
बंधोवज्रवत्अर्द्धकीलिकाभवतितदर्द्धनाराचसंहनननामयतःकीलितइवसामान्यास्थिबंधोभवतितत्कीलितसं

=दशांत तस्तयः समचतुरस्र लक्षणं

हननामयतःपरस्परसं बंधोस्थिबंधो भवति तदसंप्राप्तसृपाटिकासंहनननाम श्वेतपीतहरितरक्तारुणभेदाद्वर्णनाम पं
चधा तत्स्वस्वशरीराणां श्वेतादिवर्णोत्पत्तकर्म करोति तद्वर्णनाम सुगंधदुर्गंधभेदाद्गंधनाम द्विधा स्वस्वशरीराणां स्वस्वगंधं
करोति यत्तद्गंधनाम तिक्तकटुकषायाम्लमधुरभेदाद्रस नाम पंचधा तत्र तु स्वस्वशरीराणां यत्तु स्वस्वरसं करोति तत्तद्र
सनाम लवणनामरसो लौकिकैः षष्ठोस्ति स मधुररसलक्षण एवेति। परमागमे पृथक् नोक्तो। लवणं विना इतररसानां
स्वादुत्वासंभवात्। मृदुकर्कशगुरुलघुशीतोष्णस्निग्धरूक्षभेदात्स्पर्शनाम अष्टकं तत्र तु स्वस्वशरीराणां स्वस्वस्पर्शं
करोति नारकतिर्यग्मनुष्यदेवगत्यानुपूर्वीलक्षणादानुपूर्वीनाम चतुर्धा स्वस्वगतिगमने विग्रहगतौ स्वास्वादायत्पू
र्वशरीराकारं करोति अगुरुलघुनाम स्वस्वशरीरं गुरुत्वलघुत्ववर्जितं करोति उपघातनाम स्वबाधाकारकं चंदादि
शरीरावयवं करोति परघातनाम परबाधाकारकं सर्पदंष्ट्रागोशृंगादि शरीरावयवं करोति आतपनाम उष्णप्रतापं क
रोति तच्च सूर्यबिंबबादरपर्याप्तपृथ्वीकायिकस्य भवति उद्योतनाम शीतलप्रकाशं करोति तच्च चंद्रतारकादिबिंबग
तजोवायुसाधारणवर्जितबादरपर्याप्ततिर्यग्जीवस्य भवति उच्छ्वासनिःश्वासनाम उच्छ्वासनिःश्वासौ करोति विहायो
गतिनाम प्रशस्ताप्रशस्तभेदाद्द्विधा तत्र प्रशस्तविहायोगतिनाम मनोज्ञं गमनं करोति। अप्रशस्तविहायोगतिनाम
अमनोज्ञं गमनं करोति त्रसनाम द्वीन्द्रियाणां चलनोद्वेजनादियुक्तं त्रसकायं करोति स्थावरनाम पृथिव्याद्येकेंद्रि
याणां चलनोद्वेजनादिरहितस्थावरकायं करोति बादरनाम परैर्बाध्यमानं स्थूलशरीरं करोति सूक्ष्मनाम परै ४
रबाध्यमानं सूक्ष्मशरीरं करोति पर्याप्तनाम स्वस्वपर्याप्तीनां पूर्णतां करोति अपर्याप्तनाम स्वस्वपर्याप्तीनाम

श्लीलतां करोति। पर्याप्तयश्च आहारशरीरेंद्रियोश्वासनिश्वासभाषामनःसंबंधेन षोढा भवंति। तत्राहारवर्गणायातपुद्गलस्कंधा।
नां खलरसभागरूपेण परिणमने आत्मनः शक्तिनिष्पत्तिराहारपर्याप्तिः खलभागमस्थ्यादिकठिनावयवरूपेण रसभागं रसरु
धिरादिद्रवावयवरूपेण च परिणमयितुं जीवस्य शक्तिनिष्पत्तिः शरीरपर्याप्तिः स्पर्शनादींद्रियाणां योग्यदेशावस्थितस्वस्वविष
यग्रहणे जीवस्य शक्तिनिष्पत्तिरिंद्रियपर्याप्तिः आहारवर्गणायातपुद्गलस्कंधान् उश्वासनिश्वासरूपेण परिणमयितुं जीव
स्य शक्तिनिष्पत्तिरुश्वासनिश्वासपर्याप्तिः भाषावर्गणायातपुद्गलस्कंधान् सत्यादिचतुर्विधवाक्स्वरूपेण परिणमयितुं जी
=अनुभवन ६ वस्य शक्तिनिष्पत्तिर्भाषापर्याप्तिः। दृष्टश्रुतानुमितार्थानां गुणदोषविचारणादिरूपभावमनःपरिणमनेन मनोवर्गणाया
तपुद्गलस्कंधान् द्रव्यमनोरूपपरिणामेन परिणमयितुं जीवस्य शक्तिनिष्पत्तिर्मनःपर्याप्तिः। प्रत्येकशरीरनाम। ए
कस्य एकशरीरस्वामित्वं करोति साधारणशरीरनाम अनंतजीवानां एकशरीरस्वामित्वं करोति स्थिरनाम रसरुधिरमांस
मेदास्थिमज्जशुक्राणां सप्तधातूनां अचलत्वं करोति अस्थिरनाम तेषां सप्तधातूनां चलितत्वं करोति शुभनाम। म
स्तकादिप्रशस्तावयवं करोति अशुभनाम पादाद्यप्रशस्तावयवं करोति शुभगनाम परेषां रुचिरत्वं करोति दुर्भग
नाम अरुचिरत्वं करोति सुस्वरनाम श्रवणरमणीयं स्वरं करोति। दुःस्वरनाम श्रवणदुःसहं स्वरं करोति आदेयनाम
परेर्मान्यतां करोति अनादेयनाम अमान्यतां करोति यशस्कीर्तिनाम गुणकीर्तनं करोति अयशस्कीर्तिनाम दोष
कीर्तनं करोति नि र्माणनाम शरीरवतूस्वस्वस्थाने शुं स्थिरानुपांजलित्वं करोति तीर्थकरत्वं नाम पंचकल्याण
चतुस्त्रिंशदतिशयाष्टमहाप्रातिहार्यसमवसरणादिबहुविधोचितविभूतिसंयुतार्हंत्यलक्ष्मीं करोति

× ख २

×वीर्यशक्तिः सामर्थ्यं तस्य विघ्नहेतुर्वीर्य॥४

।उच्चनीचभेदाद्गोत्रकर्म द्विधा। तत्र महाव्रतचरणयोग्योत्तमकुलकारणमुच्चैर्गोत्रं। तद्विपरीतचरणायोग्यनीचकुलकारणं नीचै
र्गोत्रं। दानलाभभोगोपभोगवीर्य्यभेदादंतरायकर्म पंचधा। तत्र दानस्य विघ्नहेतुर्दानांतरायः। लाभस्य विघ्नहेतुर्लाभांत
रायः। सकृद्भुक्त्वा परिहातव्यो भोगस्तस्य विघ्नहेतुर्भोगांतरायः। सकृद्भुक्त्वा पुनश्चभोक्तव्यः उपभोगस्तस्य विघ्नहेतुरुपभोगांतरा
यः। वीर्यांतरायः एवमुत्तरप्रकृतिबंधः कथितः। उत्तरोत्तरप्रकृतिबंधो वाग्गोचरो न भवति। अथ स्थितिर्भेद उच्यते। ज्ञानावरणी
यादिप्रकृतीनां ज्ञानप्रच्छादनादिस्वस्वभावापरित्यागेनैवस्थानं स्थितिः तत्कालस्योपचारात्॥ तद्यथा॥ ज्ञानावरणीयदर्श
नावरणीयवेदनीयांतरायप्रकृतीनामुत्कृष्टा स्थितिस्त्रिंशत्कोटाकोटीसागरोपमप्रमिता दर्शनमोहनीयस्य स्थितिः सप्तति
कोटाकोटीसागरोपमप्रमाणा चारित्रमोहनीयस्य स्थितिश्चत्वारिंशत्कोटाकोटीसागरोपमप्रमिता नामगोत्रयोर्विंशतिको
टाकोटीसागरोपममात्री आयुष्यकर्मणस्त्रयस्त्रिंशत्सागरोपमप्रमाणा इत्युत्कृष्टस्थितिः उक्ता वेदनीयस्य जघन्यस्थितिर्द्वा
×अ.१६ दशमुहूर्त्ता नामगोत्रयोः अंतर्मुहूर्त्तः शेषाणां ज्ञानावरणीयदर्शनावरणीयमोहनीयायुष्यांतरायाणां जघन्यस्थि
तिरंतर्मुहूर्त्ता सर्वेषां कर्मणां मध्यमा स्थितिर्नानाविकल्पा इति उक्ता॥ अथानुभाग उच्यते। कर्मप्रकृतीनां तीव्रमंदमध्यम
शक्तिविशेषोऽनुभागः घातिकर्मणामनुभागो लतादार्वस्थिशैलसमानश्चतुर्द्धा। अघातिकर्मणामशुभप्रकृतीनामनुभा
गो निंबकांजीरविषहालाहलसदृशश्चतुःस्थानः शुभप्रकृतीनामनुभागो गुडखंडशर्करामृतसमानश्चतुःस्थानः इ
त्यनुभाग उक्तः। अथ प्रदेश उच्यते। आत्मप्रदेशेषु द्व्यर्द्धगुणहानिगुणितसमयप्रबद्धमात्राणां सिद्धराश्यनंतैकभागप्र ५
मितानामभव्यजीवस्यानंतगुणानां सर्वकर्मपरमाणूनां परस्परप्रदेशानुप्रवेशलक्षणः प्रदेशबंधः इति प्रदेशबंध उक्तः

=खयोवसमविसोहीदेसणपाउग्गकरणलद्धीए। चत्तारिविसामण्णाकरणेपुणहोइसम्मत्तं॥१०

एवंप्रकृतिस्थित्यनुभागप्रदेशविकल्पानि पौद्गलिकानि द्रव्यकर्माणि कथितानि। उक्तज्ञानावरणादिद्रव्यकर्मोदयजनिता आत्म
नोऽज्ञानरागमिथ्यादर्शनादिपरिणामविशेषा भावकर्माणि तान्यप्यसंख्यातलोकमात्राणि भवंति। औदारिकवैक्रियिकाहार
कतैजसशरीरपरिणमनपुद्गलस्कंधा नोकर्मद्रव्याणि। एवंविधद्रव्यभावनोकर्मसंयुक्ताः पंचविधसंसारपरिणताश्चतसृषु परि
वर्त्तमाना जीवाः संसारिणः। तत्कर्मत्रयविमुक्ताः सिद्धगतावेव स्थिताः क्षायिकसम्यक्त्वज्ञानदर्शनवीर्यसूक्ष्मत्वावगाहनागु
रुलघुत्वाव्याबाधनरूपाष्टगुणपरिणताः सिद्धपरमेष्ठिनो जीवाः मुक्ताः। तत्र संसारिणो जीवा भव्याभव्यभेदेन द्विधा। तत्र रत्नत्रय
सामग्र्या सकलकर्मक्षयं कृत्वानंतज्ञानादिस्वरूपोपलब्धिभवनायोग्यशक्तिविशेषसहिता भव्याः। एतद्विपरीता अभव्याः। तत्र
चतुर्दशगुणस्थानवर्त्तिनो भव्याः। एक [illegible] मिथ्यादृष्टिगुणस्थान [illegible] वर्त्तमाना अभव्याः। तेषां कदाचिदपि सम्यग्दर्शनप्राप्ति
कारणकरणत्रयविधानासंभवात्। तत्र दर्शनमोहनीयस्य मिथ्यात्वप्रकृतेरुदयादत [illegible] त्वश्रद्धानरूपं मिथ्यादर्शनं परिण
तः सर्वज्ञवीतरागप्रणीतं जीवादितत्त्वमश्रद्दधानः संशयनो वान्यप्रणीतमतत्त्वं श्रद्दधानो वा जीवो मिथ्यादृष्टिरिति प्रथमगुण
स्थानवर्त्ती भवति। अनादिमिथ्यादृष्टिर्वा सादिमिथ्यादृष्टिर्वा लब्धिपंचकसंनिधाने प्रथमोपशमसम्यक्त्वं गृह्णाति॥ तद्यथा॥ क
दाचित्कस्यचिज्जीवस्याशुभकर्मणामनुभागप्रतिसमयमनंतगुणहान्योदेति तेषां सर्वघातिस्पर्द्धकानामनंतगुणहानिं वि
धायतद्व्यस्य सदवस्थारूपोपशमः अनंतगुणहीनानुभागोदयसत्वापेक्षया प्रशमः इत्युच्यते। तस्य लब्धिः क्षयोपशमलब्धिः
क्षायोपशमलब्धेर्मत्यानुत्पन्नः सातादिप्रशस्तप्रकृतिबंधकारणं जीवस्य यो विशुद्धिपरिणामस्तल्लाभो विशुद्धिलब्धिः। षट्
द्रव्यपंचास्तिकायसप्ततत्त्वनवपदार्थानामुपदेशकारकाचार्योपाध्यायादेशनालाभः उपदेशकरहितात्रशास्त्रोप
दिष्टजीवादितत्त्वधारणाः स्मरणलाभो वा देशनालब्धिः। आयुर्वर्जितसप्तकर्मणामुत्कृष्टस्थितिं विशुद्धिपरिणामवि।

शेषेणखंडयित्वांतःकोटाकोटीस्थितिंस्थापयति।लतादार्वस्थिशैलरूपघातिकर्मानुभागंखंडयित्वालतादारुरूपेद्विस्थानंस्थापय
तितद्विशुद्धिपरिणामेयोग्यतालाभःप्रायोग्यतालब्धिःदर्शनमोहोपशमनादिकरणविशुद्धिपरिणामःकरणंइत्युच्यतेतल्लाभःकरण
लब्धिः॥सचकरणोधःप्रवृत्तकरणोपूर्वकरणोनिवृत्तिक रणश्चेतित्रिधातत्राधःप्रवृत्तकरणकालोंतर्मुहूर्त्तमात्रः२१११त
तःसंख्येयगुणहीनोपूर्वकरणकालः२११ततःसंख्येयगुणहीनोनिवृत्तिकरणकालः२१इतियंसमुदितमप्यंतर्मुहूर्त्ते
कालएवअधःप्रवृत्तकरणप्रथमसमयादारभ्यविशुद्धिःप्रतिसमयमनंतगुणाप्यनिवृत्तिकरणचरमसमयंवर्द्धतेतत्राधः
प्रवृत्तकरणकालेसंख्यातलोकमात्रविशुद्धिपरिणामविकल्पाःजघन्यमध्यमोत्कृष्टाःसंतितत्रोत्कसंदृष्ट्याधःप्रवृ त्तकर
णलक्षणमुच्यतेप्रथमसमयेनानाजीवानांविशुद्धिपरिणामविकल्पानांजघन्यखंडमिदं।३९।अस्माद्द्वितीयंखंडंविशे
षाधिकं।४०।तृतीयंविशेषाधिकं।४१।एवंचरमचतुर्थखंडंविशेषाधिकं।४२।द्वितीयसमयेजघन्यखंडाद्विशेषाधिकं।४०।
ततोद्वितीयखंडंविशेषाधिकं।४१।ततस्तृतीयखंडंविशेषाधिकं।४२।एवंचरमखंडंविशेषाधिकं।४३।एवंतृतीयादि
समयेषुचरमसमयेजघन्यादिखंडानिविशेषाधिकानिस्तवंतियकेषांचिज्जीवानामुपरिमसमयपरिणामवर्त्तिनांवि
शुद्धिपरिणामविकल्पाःअधस्तनसमयवर्त्तिनांकेषांचिज्जीवानांविशुद्धिपरिणामविकल्पैःसदृशाःसंतीत्यधःप्र
वृत्तकरणसंज्ञाभुक्तातत्रप्रथमसमयजघन्यंचरमसमयचरमखंडंचकेनापिजघन्यो त्कृष्टेनसदृशंनभवतितथा
पितद्द्वयंविहायइतरेषांसर्वेषांखंडानामनुपर्यधःसादृश्यमस्तीतितन्नाधःप्रवृत्तकरणसंज्ञानविरुध्यतेतन्नामेइ
ष्टिः॥अस्मिन्नधःप्रवृत्तकरणेप्रश स्तप्रकृतीनामनुभागप्रतिसमय

| | | | |
|---|---|---|---|
| ५४ | ५५ | ५६ | ५७ |
| ५३ | ५४ | ५५ | ५६ |
| ५२ | ५३ | ५४ | ५५ |
| ५१ | ५२ | ५३ | ५४ |
| ५० | ५१ | ५२ | ५३ |
| ४९ | ५० | ५१ | ५२ |
| ४८ | ४९ | ५० | ५१ |
| ४७ | ४८ | ४९ | ५० |
| ४६ | ४७ | ४८ | ४९ |
| ४५ | ४६ | ४७ | ४८ |
| ४४ | ४५ | ४६ | ४७ |
| ४३ | ४४ | ४५ | ४६ |
| ४२ | ४३ | ४४ | ४५ |
| ४१ | ४२ | ४३ | ४४ |
| ४० | ४१ | ४२ | ४३ |
| ३९ | ४० | ४१ | ४२ |

मनंतगुणोवर्द्धते।अप्रशस्तप्रकृतीनामनुभागः प्रतिसमयमनंतगुणहीनोभवति संख्यातसहस्रस्थितिबंधापसरणा
निभवंतिप्रतिसमयमनंतगुणवृद्ध्याविशुद्धिश्चवर्द्धते इत्येतानिचत्वारिआवश्यकानिभवंतितु न गुणश्रेणिनिर्ज
रागुणसंक्रमणस्थितिकांडकघातानुभागकांडकघाताश्चेतिचत्वार्यावश्यकानितानिनसंतितत्कारणविशुद्धिवि
शेषाभावात्।ततः परंअपूर्वकरणप्र थमसमयेगुणश्रेणिनिर्जरागुणसंक्रमणस्थितिकांडकघातानुभागकांडक
घाताश्चचारस्युः तेषु तत्रापिजघन्यमध्यमोत्कृष्टाविशुद्धिपरिणामा अधःप्रवृत्तपरिणामेभ्योसंख्यातलोकगुणिताः संति।
तत्रप्रथमसमयवर्तिनानाजीवविशुद्धिपरिणामाः असंख्यातलोकमात्राः अंकसंदृष्ट्या।४५६।एतेसर्वेप्यकमेवखंडंबद्ध
खंडानिनसंतिउपरितनसमयपरिणामैः सादृश्याभावात्।द्वितीयसमय परिणामाविशेषाधिकं।४७२।एतेप्येकमेव
खंडंउपर्यधोधश्चसादृश्याभावाद्बद्धखंडाभावएवं तृतीयादिसमयेष्वाचरमसमयंविशुद्धिपरिणामाएकैक
खंडंकृताः विशेषाधिकाः संति।अतएवकारणात्पूर्वपूर्वसमयेप्रवृत्ताएवविशुद्धिपरिणामाउत्तरसमयेभवंतीति पूर्व × स९
करणसंज्ञाउक्तातस्या अंकसंदृष्टिः।४५६।४७२।४८८।५०४।५२०।५३६।५५२।५६८।ततः परमनिवृत्तिकरणप्र
थमसमयेनानाजीवानांविशुद्धिपरिणामोपूर्वकरणचरमसमयसर्वोत्कृष्टविशुद्धिपरिणामादनंतगुणविशु
द्धिर्जघन्यमध्यमोत्कृष्टविकल्पाभावादेकादृश एवद्वितीय समयेपिप्रथमसमयविशुद्धेरनंतगुणविशुद्धि
र्नानाजीवानामेकादृशएवविशुद्धिपरिणामोभवतिएवंतृतीयादिसमयेष्वनिवृत्तिकरणचरमसमयंप्रतिसमय
मनंतगुणवृद्ध्याविशुद्ध्यावर्द्धमानापिनानाजीवानांविशुद्धिपरिणामाजघन्यमध्यमोत्कृष्टविकल्परहि